# नवमः पाठः

प्रस्तुतोऽयं पाठः 'भारत-भारती-वैभवम्' इत्याख्य-ग्रन्थाद् संकलितः। अस्य महनीय-ग्रन्थस्य रचनाकारः श्रीनिम्बार्काचार्यपीठाधीश्वरः श्रीराधासर्वेश्वरशरणदेवाचार्यः 'श्रीजी' महाराजः वर्तते। मातृभूमेः भारतस्य, भारत्याः च संस्कृतभाषायाः वन्दनात्मकं सुन्दरं गीतिकाव्यम् एतदस्ति, यत्र 'गीता-गङ्गा-गावश्च' इत्येवं गकारत्रयी अपि सुष्ठु वर्णिता। अत्र संगृहीतः ग्रन्थस्य अस्य स्वल्पः अंश एव एतावद्-कलात्मकः, सर्वाङ्गसुन्दरः, मधुरश्चास्ति यत् बंकिमचन्द्रस्य 'वन्देमातरम्' इति गीतम् अनायासं स्मारयति।

## भारत-वैभवम्

**वन्दे नितरां भारतवसुधाम्।**
**दिव्यहिमालय-गङ्गा-यमुना-सरयू-कृष्णाशोभितसरसाम्।।**

**मुनिजनदेवैरनिशं पूज्यां जलधितरङ्गैरञ्चितसीमाम्।**
**भगवल्लीला-धाममयीं तां नाना तीर्थैरभिरमणीयाम्।।**

**अध्यात्मधरित्रीं गौरवपूर्णां शान्तिवहां श्री-वरदां सुखदाम्।**
**सस्यश्यामलां कलितामलां कोटि-कोटिजनसेवितमुदिताम्।।**

**वीरकदम्बैरतिकमनीयां सुधीजनैश्च परमोपास्याम्।**
**वेद-पुराणैर्नित्यसुगीतां राष्ट्रसुभक्तैरीड्यां भव्याम्।।**

**नानारत्नैर्मणिभिर्युक्तां हिरण्यरूपां हरिपदपुण्याम्।**
**राधासर्वेश्वरशरणोऽहं वारं वारं वन्दे रम्याम्।।**

## शब्दार्थाः

**भारत-वसुधाम्** — भारत-भूमिम्। **नितराम्-** सततम्। **वन्दे**—अभिवादये। कीदृशीं भारत-वसुधाम् -**दिव्यहिमालय-गंगा-यमुना-सरयू-कृष्णाशोभितसरसाम्** — परमदिव्यो हिमालयो नाम नगाधिराजः पुनश्च गङ्गा-भागीरथी। यमुना-कालिन्दनन्दिनी। सरयू-वासिष्ठी। कृष्णा-कावेरी प्रभृति-नदीभिः पावनतमाम्। **मुनिजनदेवैरनिशम्** — सुरनरमुनिवृन्दैर्नित्यम्। **पूज्याम्** — आराध्याम्। **जलधितरङ्गैः** — समुद्रवीचिभिः। **अञ्चितसीमाम्** — परिशोभित-प्रान्तभागाम्। **भगवल्लीलाधाममयीम्** — भगवत्क्रीडास्थलमयीम्। **नानातीर्थैरभिरमणीयाम्-** विविधतीर्थैरतिमनोहराम्। **अध्यात्मधरित्रीम्-** अध्यात्मविद्याधरणीम्। **गौरवपूर्णाम्** — महत्वपूर्णाम्। **शान्तिवहाम्** — शान्ति-प्रदाम्। **श्रीवरदाम्** — लक्ष्मीदात्रीम्। **सुखदाम्** — सुखप्रदाम्। **सस्यश्यामलाम्** — धन-धान्यपरिपूर्णाम्। **कलिताम्**— ललिताम् अर्थात् सुन्दरतमाम्। **अमलाम्** — निर्मलाम्। **कोटि-कोटिजनसेवितमुदिताम्** — असंख्य-जन-निस्सेवनेन सुप्रसन्नाम्। **वीरकदम्बैरतिकमनीयाम्** — वीरपुरुषसमूहैः सुमनोहराम्। **सुधीजनैश्च** — बुधजनैश्च। **परमोपास्याम्-** परिसेव्याम्। **वेदपुराणैर्नित्यसुगीताम्** — निगमागमशास्त्रैरनिशं प्रगीयमानाम्। **राष्ट्रसुभक्तैरीड्याम्** — देशभक्तैः संस्तुताम्। **भव्याम्** — विशालाम्। **नानारत्नैर्मणिभिर्युक्ताम्** — मुक्ता-माणिक्य-प्रवालादिविविधरत्नैर्मणिभिश्च भरिताम्। **हिरण्यरूपाम्** — स्वर्णस्वरूपाम्। **हरिपदपुण्याम्** — भगवच्चरणसमलङ्कृताम्, अतएव पुण्याम्। **रम्याम्** — परममनोहराम्। ताम्-भारतवसुधाम्। **अहम्** — ग्रन्थकारः। **वारं वारम्** — मुहुर्मुहुः। **वन्दे** — अभिवादये।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. 'भारत-वैभवम्' इति पाठः कस्माद् ग्रन्थाद् गृहीतः वर्तते —

(अ) भारत-भारती (आ) देवभारती- वैभवम्

(इ) भारत-भारती-वैभवम् (ई) सुरभारती-वैभवम्। ( )

२. 'वन्दे नितरां भारत-वसुधाम्' इत्यस्य रचनाकारः अस्ति —

(अ) श्रीजी महाराजः (आ) श्रीमहेश्वरानन्दगिरिजी महाराजः

(इ) श्रीईश्वरानन्दगिरिजी महाराजः (ई) श्री संवित्सोमगिरिदेवः ( )

३. वीरकदम्बैरतिकमनीयाम् — इत्यत्र कदम्ब-शब्दस्य अर्थोऽस्ति —

(अ) वृक्षविशेषः (आ) पुष्पविशेषः

(इ) समूहः (ई) वसन्तः ( )

**लघूत्तरात्मक-प्रश्नाः**

१. राधासर्वेश्वरशरणः कोऽस्ति ?

२. 'भारतवसुधाम्' इत्यस्य पञ्चविशेषणानि कानिचन लिख्यन्ताम्।

३. सन्धिविच्छेदं कुर्वन्तु —

१. भगवल्लीला ................+................

२. सुधीजनैश्च ................+................

३. परमोपास्याम् ................+................

४. सुभक्तैरीड्याम् ................+................

**निबन्धात्मक-प्रश्नाः**

१. पाठम् अनुसृत्य भारतवसुधायाः महत्त्वं वर्णयन्तु।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

1. (इ) 2. (अ) 3. (इ)

**परियोजनात्मकं कार्यम्-**

भारतभक्तियुतं किमपि एकं संस्कृत-हिन्दी-बंग्ला-राजस्थानी-गीतं कण्ठाग्रं कृत्वा कक्षायां श्रावयन्तु।